# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2024)
# विषय : संस्कृतम्

**कक्षा - द्वादशी** **कोड न. - 526**

**SET : C**

रोल नं० [ | | | | | | | | | ]

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :–**

  I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
  II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 18 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

Downloaded from cclchapter.com

# खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

आसीत् पुरा कस्मिंश्चित् वने निसर्गरमणीयं शान्तं पवित्रं किमपि आश्रमपदम्। तत्र तपः परायणाः ऋषयः वसन्ति स्म। ऋषीणां तपः प्रभावात् परस्परं वैरभावम् अपहाय पशवः पक्षिणश्च निर्भयं तत्र विचरन्ति स्म। आसीत् तत्र वरतन्तुनाम कुलपतिः। तत्र अनेके मेधाविनः बटवः अपठन्। तेषु कश्चन आकृत्या मृदुलः प्रकृत्या सरलः कौत्सनाम बटुः आसीत्। अयं बालः स्वल्पेनैव कालेन वेदानां वेत्ता, पुराणानां पठिता, दर्शनशास्त्राणां विज्ञाता चाभवत्।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) आश्रमे वरतन्तुः कः आसीत् ?
(ख) कौत्सनाम बटुः केषां वेत्ता अभवत् ?
(ग) कुत्र अनेके मेधाविनः बटवः अपठन्?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) आश्रमपदं कीदृशम् आसीत्?

(ख) आश्रमपदे के वसन्ति स्म?

(ग) केषां प्रभावात् पशवः पक्षिणश्च आश्रमपदे विचरन्ति स्म?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) अस्मिन् गद्यांशे 'कठोरः' इत्यस्य शब्दस्य कृते किं विलोमपदं प्रयुक्तम्?
(क) सरलः (ख) बालः
(ग) मृदुलः (घ) तपः

(ii) 'वने' इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) षष्ठी (घ) सप्तमी

(iii) 'सरलः' इत्यस्य विशेष्यपदं किम्?
(क) बटुः (ख) पटवः
(ग) मृदुलः (घ) बटवः

(iv) 'आसीत् पुरा कस्मिंश्चित् वने निसर्गरमणीयं शान्तं पवित्रं किमपि आश्रमपदम्।' इत्यस्मिन् वाक्ये 'आसीत्' क्रियापदस्य कर्ता कः?
(क) वनम् (ख) आश्रमपदम्
(ग) पवित्रम् (घ) शान्तम्

Downloaded from cclchapter.com

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य षड्वाक्यानि संस्कृतभाषया लिखत - 6

(क) प्रातः कालीन भ्रमणम्

(ख) सत्सङ्गतिः

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) समयस्य सदुपयोगः

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) मालिनीछन्दसः लक्षणं किम्?

(ख) वंशस्थछन्दसः उदाहरणं किम्?

(ग) शिखरिणीछन्दसि कति वर्णाः भवन्ति?

(घ) उक्ता ............... तभजाजगौगः । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) अनुप्रास-अलङ्कारस्य लक्षणं किम्?

(ख) रूपकस्य अलङ्कारस्य उदाहरणं किम्?

(ग) श्लेषस्य अलङ्कारस्य लक्षणं किम्?

(घ) सिद्धत्वेऽध्यवसायस्य ....................... निगद्यते। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः 'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

इत्थं द्विजेन द्विजराजकान्ति-
रावेदितो वेदविदां वरेण।

Downloaded from cclchapter.com

एनो निवृत्तेन्द्रियवृत्तिरेनं

जगाद भूयो जगदेकनाथः।।

**अथवा**

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।

तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

एवं चतुर्णां परस्परं विवादो लग्नः। ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तान्तमकथयत्। राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ। इति कथां कथयित्वा पुत्तलिका राजानमवदत्, 'भो राजन्, त्वय्येवंविधसहजमौदार्यं विद्यते चेदस्मिन् सिंहासने समुपविश।' तच्छ्रुत्वा राजा तूष्णीमासीत्।

**अथवा**

तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयप्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्धूतैः रेणुभिः शीर्णपत्रैः कुसुमपरागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।

(ख) सर्वे अश्रुलहृदयैः सौप्रस्थानिकीं ज्ञापितवन्तः।

(ग) वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।

(घ) कोटीश्चतस्रो दश चाहरेति।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्तव्यः।

पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये।।

**अन्वयः :-**

1) ............... दातव्यं भोक्तव्यं 2) ....................... न कर्तव्यः पश्य इह 3) ...................

सञ्चितम् अर्थम् अन्ये 4) ...................... ।

**मञ्जूषा**

| |
|---|
| मधुकरीणाम्, धनविषये, हरन्ति, सञ्चयो |

Downloaded from cclchapter.com

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्।।

**प्रश्नाः -**

(क) महात्मनां विपदि किं भवति ?

(ख) केषां यशसि अभिरुचिः भवति ?

(ग) 'सदसि' इत्यस्मिन् पदे का विभक्तिः?

(घ) 'अभ्युदये' इत्यस्मिन् पदे कः सन्धिः?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

श्रीनायारस्य दायित्वग्रहणस्य एकमासाभ्यन्तरे बहुदिनेभ्यः स्थगितानां विविध समस्यानामपि समाधानं जातम्। स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः।

(क) अपरस्य सहकारः कस्य परमधर्मः?

(ख) श्रीनायारस्य दायित्वग्रहणस्य कतिमासाभ्यन्तरे विविध समस्यानां समाधानं जातम्?

(ग) 'त्यक्त्वा' इत्यस्मिन् पदे कः प्रत्ययः ?

(घ) 'समस्यानाम्' इत्यस्मिन् पदे का विभक्तिः ?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)
4×1=4

(क) जगत्सर्वम् <u>ईशावास्यम्</u> अस्ति। (किम् / कीदृशम्)

(ख) समुद्रः राज्ञे <u>व्ययार्थं</u> रत्नचतुष्टयं दत्तवान्। (केषाम् / किमर्थम्)

(ग) तस्य <u>राज्येन</u> सह कश्चित् सम्पर्कः नास्ति। (केन / कस्य)

(घ) निपुणं निरुप्यमाणः लवः मुखचन्द्रेण <u>सीतया</u> संवदत्येव। (काम् / कया)

(ङ) <u>कुबेरात्</u> अर्थं निष्क्रष्टुं रघुः चकमे। (कस्मात् / कस्मै)

Downloaded from cclchapter.com

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) 'विद्ययाऽमृतमश्नुते' अयं पाठः कस्याः उपनिषदः सङ्कलितः?

(ख) 'कर्मगौरवम्' अयं पाठः कस्मात् ग्रन्थाद् उद्धृतः?

(ग) महाकविः भवभूतिः कस्य रसस्य अभिव्यक्तये विशेषं प्रशस्यते?

(घ) रघुवंशमहाकाव्ये कति सर्गाः सन्ति?

(ङ) शुकनासोपदेशे नायकस्य नाम किम्?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) उत्तररामचरितस्य रचयिता कः?

(ख) कादम्बरीगद्यकाव्यस्य रचयिता कः?

(ग) भामिनीविलासस्य ग्रन्थस्य रचयिता कः?

(घ) 'किरातार्जुनीयम्' अस्य महाकाव्यस्य रचयिता कः?

(ङ) नीतिशतकस्य रचयिता कः?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) विसर्गसन्धेः अथवा दीर्घसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) तत्पुरुषसमासस्य अथवा द्वन्द्वसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) कर्मकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

Downloaded from cclchapter.com

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

1) 'तस्यैव' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) तस्या + एव | ख) तस्य + एव
ग) तस्य + इव | घ) तस्या + इव

2) 'शिशोरपि' इत्यस्मिन् शब्दे कः सन्धिः?

क) गुणसन्धिः | ख) व्यञ्जनसन्धिः
ग) अयादिसन्धिः | घ) वृद्धिसन्धिः

3) 'हि + एवम्' इत्यस्य सन्धियुक्तं पदं किम्?

क) ह्येवम | ख) ह्यवम्
ग) ह्येवाम् | घ) ह्येवम्

4) 'उपक्रान्तवान्' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) ष्यञ् | ख) क्तवतु
ग) क्त्वा | घ) मयट्

5) 'संपोष्य' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) ल्यप् | ख) ईष्य
ग) शतृ | घ) शानच्

6) 'उत् + स्था + क्त' एतेषु संयोगे किं रूपं भवति?

क) उत्थित | ख) उत्थितम
ग) उत्थितः | घ) ऊत्थितः

7) 'आत्मश्रेयसि' इत्यस्मिन् शब्दे कः समासः?

क) पञ्चमी-तत्पुरुषः | ख) षष्ठी-तत्पुरुषः
ग) सप्तमी-तत्पुरुषः | घ) तृतीया-तत्पुरुषः

Downloaded from cclchapter.com

8) 'महोत्साहः' इत्यस्य शब्दस्य कः विग्रहः?

क) महान उत्साहः
ख) महतः उत्साहः
ग) महते उत्साहः
घ) महान् उत्साहः

9) 'कर्मसु नैपुण्यम्' अत्र समस्तपदम् किम्?

क) कर्मसुनैपुण्यम्
ख) कर्मणानैपुण्यम्
ग) कर्मनैपुण्यः
घ) कर्मनैपुण्यम्

10) 'कर्मणा' इत्यस्मिन् शब्दे का विभक्तिः?

क) तृतीया
ख) चतुर्थी
ग) पञ्चमी
घ) षष्ठी

11) 'ईक्षते' इत्यस्मिन् शब्दे कः लकारः?

क) लट् लकारः
ख) लृट् लकारः
ग) लोट् लकारः
घ) लङ् लकारः

12) 'नरे' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) नरः
ख) मनुष्यः
ग) ईश्वरः
घ) मनुष्ये

13) 'न्यूनः' इत्यस्य शब्दस्य विलोमपदं किम्?

क) श्रेष्ठः
ख) ज्यायः
ग) गुणैः
घ) रिक्तः

14) 'मूर्खः' इत्यस्य शब्दस्य विलोमपदं किम्?

क) अल्पज्ञः
ख) श्रेष्ठः
ग) विद्वान्
घ) बुद्धिहीनः

15) 'अनुमितव्ययस्य' इत्यस्य शब्दस्य विशेष्यपदं किम्?

क) रघोः
ख) वरतन्तोः
ग) कौत्सस्य
घ) नरेन्द्रः

16) 'वर्षत्रयस्य' इत्यस्य शब्दस्य विशेषणपदं किम्?

क) गतस्य
ख) वार्तालापस्य
ग) आगत्य
घ) रघुवीरस्य

Downloaded from cclchapter.com